**संस्कृतवार्ताः**

**दिनाङ्क :-29.10.2024** **प्रातः - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-धनवन्तरीजयन्ती**

प्रधानमन्त्री नरेन्द्र मोदी अद्य धन्वन्तरीजयन्त्यवसरे तथा नवमे आयुर्वेददिवसस्यावसरे नवदिल्ल्यां प्रायः सार्द्ध अष्टशतोत्तर द्वादशसहस्र कोटिरूप्यकाणां स्वास्थ्यक्षेत्रसम्बद्धानां बहुविधपरियोजनानाम् उद्घाटनं, आधारशिलास्थापनं च करिष्यति। प्रधानमन्त्री आयुष्मानभारत,प्रधानमन्त्री जन आरोग्ययोजनायां प्रमुखपरियोजनारूपेण सप्ततिः वर्षतोप्यधिक आयुवर्गाणां सर्वेषां वरिष्ठनागरिकाणां स्वास्थ्यसेवायाः विस्तारं करिष्यति। स्वास्थ्यसेवामूलसंरचनायाः प्रमुखप्रवर्धनरूपेण श्रीमोदी बहुविधस्वास्थ्यसेवासंस्थानानाम् उद्घाटनं करिष्यति, आधारशिलां च स्थापयिष्यति। सः भारतस्य प्रथमस्य अखिलभारतीय आयुर्वेदसंस्थानस्य द्वितीयचरणस्य उद्घाटनं करिष्यति, यस्मिन् पञ्चकर्म-चिकित्सालयः, औषधिनिर्माणार्थं आयुर्वेदिक-औषधालयः, एकं क्रीडा-चिकित्सा एकांशम्, केन्द्रीय-पुस्तकालयः, सूचना-प्रौद्योगिकी-स्टार्ट-अप-इन्क्यूबेशन-केन्द्रं, पञ्चशतम् आसनानां च सभागारं चास्ति । मध्यप्रदेशस्य मन्दसौर, नीमच, सिओनी मण्डलेषु त्रयाणां चिकित्सामहाविद्यालयानां अपि उद्घाटयिष्यति। एतदतिरीच्य हिमाचलप्रदेशस्य बिलासपुरे, पश्चिमबङ्गस्य कल्याणी इत्यत्र, बिहारस्य पटनायां, उत्तरप्रदेशस्य गोरखपुरे, मध्यप्रदेशस्य भोपाले, असमस्य गुवाहाट्यां, नवदिल्ल्यां च विभिन्नेषु एम्स चिकित्सालयेषु सौविध्य-सेवाविस्तारस्य च उद्घाटनं करिष्यति, येषु जन औषधि केन्द्रं अपि अस्ति।

**प्रधानमन्त्री-मेलकम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्य-श्रव्य-परान्तर्जालीयमाध्यमेन नवनियुक्तेभ्यः युवभ्यः एकपञ्चाशसहस्राधिकं नियुक्तिपत्रांणि वितरिष्यति। वृतिपरं इदं मेलकं देशस्य चत्वारिंशत्-स्थानेषु आयोजयिष्यते। नियक्तिपत्रप्राप्ताः युवानः विविधेषु मन्त्रालयेषु विभागेषु च कार्यरताः भविष्यन्ति। वृत्यवसर-प्रदातृ-मेलकमिदं प्रधानमन्त्रिणः कृतप्रतिबद्धतामपि दर्शयति। नवनियुक्ताः एते युवानः Igot कर्मयोगी-अन्तर्जालपटले उपलब्धस्य आन्तर्जालिक-प्रारूपस्य कर्मयोगी-प्रारम्भ-इत्याख्यस्य साहय्येन आधारभूत-प्रशिक्षणस्य अवसरान् प्राप्स्यन्ति।

**अनुसन्धेयकार्य-झारखण्डनिर्वाचनम्**

महाराष्ट्रे एकचरणीय मतदानस्य कृते झारखण्डे च द्वितीयचरणस्य कृते नामाङ्कनपत्राणां प्रपूरणप्रक्रिया अद्य सायं अवसीयते। महाराष्ट्रस्य अष्टाशीत्यधिक-द्विशतं विधानसभासनेभ्य झारखण्डस्य च अष्टत्रिंशत् आसनेभ्यः नवम्बमासस्य विंशतिदिनाङ्के मतदानं भविष्यति मतगणना त्रयोविंशति दिनाङ्के च भविष्यति।

**भारत-स्पेन**

प्रधानमन्त्री श्रीमोदी ह्यः गुजरातस्य अमरेलीस्थाने नवशताधिक-चतुःसहस्रकोटिरूप्यकाणां परिव्ययस्य परियोजनानाम् आधारशिलां स्थापितवान्। असौ अवोचत् यत् देशे जीवन्तं रक्षा-उद्योग-निर्माणं प्रति तस्य प्रशासनेन अनेके पदक्षेपाः उत्थाप्यन्ते।

खाद्यपदार्थ-चलचित्र-पादकन्दुक-इत्येतेषां माध्यमेन भारतस्पेनदेशयोः जनानां प्रबलसम्बन्धान् आधृत्य उभौ देशौ षड्विंशत्यधिक-द्विसहस्रतमवर्षं संस्कृति-पर्यटन-कृत्रिम-मेधाननां वर्षत्वेन आपानयितुं निर्णय निर्णीतवन्तौ।

**॥इति वार्ताः॥**